| अथ प्रकीर्णकानि । | प्रायश्चित्तानि । | तदशक्तौ धेनुदानम् । | तदशक्तौ चूर्णीदानम् । | दक्षिणा । |
|---|---|---|---|---|
| | अकामतस्तदर्द्धं अर्थान्नक्तव्रतम् । | ० | ।० पणाः । | यथाशक्ति । |
| | रजस्वलाया ब्राह्मण्याः शेषवर्णरजस्वलायाः अर्थात् क्षत्रियादिरजस्वलायाः स्पर्शे षड्रात्रोपवासः । एतच्च कामतः । अकामतस्तदर्द्धम् । | १ धेनुः । | ३ कार्षापणाः । | यथाशक्ति । |
| | रजस्वलायाः शूद्रायाः सवर्णरजस्वलास्पर्शे एकरात्रोपवासः पञ्चगव्यपानञ्च । | ० | ॥० पणाः । | यथाशक्ति । |
| | सवर्णयो रजस्वलयोरन्योन्यस्पर्शे एकोपवासः पञ्चगव्यपानञ्च । | ० | ॥० पणाः । | यथाशक्ति । |
| | अत्यन्ताधमरजक्यादिरजस्वलास्पर्शे द्वादशसार्धं ब्रह्मकूर्चव्रतम् । एतच्च कामतः । अकामतस्तदर्द्धम् । एतत् सर्व्वं शुद्धिकालानन्तरं अर्थात् पञ्चमेऽहनि कार्य्यम् । | ० | १ कार्षापणतन्य-काञ्चनम् । | यथाशक्ति । |
| अथ रजस्वलायाः पतितचाण्डालादिस्पर्शः । आदिना अन्त्यजवायसयोर्ग्रहणम् । | प्रथमेऽह्नि स्पर्शे त्रिरात्रोपवासः । | ० | १॥० कार्षापणः । | यथाशक्ति । |
| | द्वितीयेऽह्नि द्व्यहोपवासः । | ० | १ कार्षापणः । | यथाशक्ति । |
| | तृतीयेऽह्नि अहोरात्रोपवासः । | ० | ॥० पणाः । | यथाशक्ति । |
| | चतुर्थेऽह्नि विशुद्धिस्नानात् पूर्व्वं स्पर्शे नक्तम् । एतच्चाकामतः । | ० | १ रौप्यमाषकम् । | यथाशक्ति । |
| | कामतः स्पर्शे सर्व्वत्र त्रिरात्रोपवासः । तदन्ते अजाघ्राता कारयितव्या च । | ० | १॥० कार्षापणः । | यथाशक्ति । |
| अथ रजस्वलाया उच्छिष्टशूद्राश्वशूकरादिस्पर्शः । आदिना जम्बूकखरग्राम्यकुक्कुटानां ग्रहणम् । | प्रथमद्वितीयदिनयोरुच्छिष्टशूद्रास्पर्शे द्व्यहोपवासः । | ० | १ कार्षापणः । | यथाशक्ति । |
| | तृतीयदिने स्पर्शे एकोपवासः । | ० | ॥० पणाः । | यथाशक्ति । |
| | चतुर्थदिने स्पर्शे नक्तम् । | ० | २ रजतमाषकौ । | यथाशक्ति । |
| | कुक्कुटादिस्पर्शे सर्व्वत्र नक्तमेव । एतच्च प्रायश्चित्तं विशुद्धिस्नानानन्तरं कर्त्तव्यम् । | ० | २ रजतमाषकौ । | यथाशक्ति । |
| | एकदेशादौ रजस्वलायाश्चाण्डालस्पर्शे अहोरात्रोपवासः । पञ्चगव्यपानञ्च । | ० | ॥० पणाः । | यथाशक्ति । |
| | रजस्वलाया उच्छिष्टचाण्डालादिस्पर्शे द्विजस्त्रीणां प्राजापत्यम् । शूद्राया धेनुदानम् । एषु प्रायश्चित्तेषु रजस्वलात्वमेव निमित्ततो न ब्राह्मण्यादिभ्यो विशेषः । अत्रापवादः । "तीर्थे विवाहे यात्रायां संग्रामे देशविप्लवे । नगरग्रामदाहे च स्पृष्टास्पृष्टि न दूष्यति ॥" | १ धेनुः । | ३ कार्षापणाः । | यथाशक्ति । |
| अथ चाण्डालादिसङ्करः । आदिना श्वपाकपुक्कसयोर्ग्रहणम् । | संवत्सरैकचाण्डालसङ्करे मासैकं गोमूत्रयावकाहारः । एतत् प्रायश्चित्तं यौनादिवर्जितसंसर्गविषयम् । | १२ धेनवः । | ३६ कार्षापणाः । | १०० गावः । अशक्तौ १०० कार्षापणाः । अभावे सर्व्वस्वम् । |
| | बालवृद्धस्त्रीशूद्राणामर्द्धम् । आषोड़शाद्वालाः । सप्तत्यूर्द्धं स्थविराः । चौर्णे प्रायश्चित्ते ब्राह्मणभोजनम् । एतत् प्रायश्चित्तं ब्राह्मणक्षत्रियविशां तुल्यमेव । | ६ धेनवः । | १८ कार्षापणाः । | ५० गावः । अशक्तौ ५० कार्षापणाः । अभावे सर्व्वस्वार्द्धम् । |